http://www.mpboardonline.com

कुल प्रश्नो की संख्या : 19 कुल पृष्ठो की संख्या : 04

द्वितीय प्री बोर्ड परीक्षा 2019–20

कक्षा–दसवी

विषय–संस्कृत सामान्यम्

समय–03 घण्टे अंकः–100

निर्देशः

(i) सर्वे प्रश्नाः करणीयाः।

(ii) लेखनं सुवाच्चं स्पष्टं च भवतु।

(iii) सवेषां प्रश्नानां समक्षे अकङ्ाः प्रदत्ताः।

प्रश्न 1. अधोलिखितेषु उचितं विकल्पं चित्वा लिखत– 1x5=5

(क) दीर्घसन्धेः उदाहरणं किम् ?

(अ) गिरीशः (ब) रमेशः (स) उल्लासः (द) स्वरितः

(ख) "नयनम्" इत्यस्मिन् सन्धिः अस्ति–

(अ) यण्सन्धिः (ब) पूर्वरुपसन्धिः (स) अयादि सन्धिः (द) विसर्गसन्धिः

(ग) 'तत् + लीनः' इत्यस्य सन्धिः भवति–

(अ) तल्लीनः (ब) तल्लीनः (स) तालीनः (द) ततृलीनः

(घ) विसर्गसन्धेः उदाहरणम् अस्ति–

(अ) मनोरथः (ब) अत्याचारः (स) विद्यालयः (द) सत्यंवद

(ङ) अधोलिखितेषु अत्ययं नास्ति–

(अ) अत्र (ब) तत्र (स) मित्रम् (द) सर्वत्र

प्रश्न 2. उचितं विकल्पं चित्वा लिखत– 1x5=5

(क) "अनादरः" इत्यस्मिन् पदे समासः अस्ति–

(अ) द्वन्द्वः (ब) कर्मधारयः (स) द्विगुः (द) नञ् तत्पुरुषः

(ख) "रुपस्य योग्यम्" इत्यस्य समस्तं पदं स्यात्–

(अ) अनुरुपम् (ब) अनुसारम् (स) प्रतिरुपम् (द) अनुवादम्

(ग) द्विगु–समासस्य उदाहरणम् अस्ति–

(अ) दशाननः (ब) त्रिभुवनम् (स) पितरौ (द) राजपुरूषः

(घ) "प्रणाम" इत्यस्मिन् कः उपसर्गः ?

(अ) प्राण् (ब) प्रा (स) प्र (द) प्

(ङ) अधोलिखितेषु उपसर्गः अस्ति–

(अ) मतुप् (ब) तत्र (स) लता (द) सु

प्रश्न 3. अधोलिखितेषु उचितं विकल्पं चित्वा लिखत– 1x5=5

(क) "अपश्यत्" इत्यस्मिन् पदे धातुः अस्ति–

(अ) पश् (ब) दृश् (स) अपं (द) दृष्टम्

(ख) "अभवत्" इत्यस्मिन् पदे कः लकारः ?

(अ) लृटलकारः (ब) लट्लकारः (स) लोटलकारः (द) लङ्लकारः

(ग) 'पास्यन्ति' इत्यस्मिन् पदे वचनम् अस्ति–

(अ) एकवचनम् (ब) बहुवचनम् (स) अमृतवचनम् (द) द्विवचनम्

(घ) 'याचसि' इत्यस्मिन् पदे पुरुषः अस्ति–

(अ) मध्यमःपुरुषः (ब) प्रथमःपुरुषः (स) उत्तमपुरुषः (द) कोऽपि न

(ङ) "कोलाहलं मा कुरुत" अस्मिन् वाक्ये अव्यम् अस्ति–

(अ) मा (ब) कुरुत (स) कोऽपिन (द) कोलाहलं

प्रश्न 4. उचितं विकल्पं चित्वा लिखत– 1x5=5

(क) "पठितव्यम्" इत्यस्मिन् धातुः अस्ति–

(अ) पठि (ब) तव्यत् (स) पठ् (द) पठित

(ख) 'जेतुम्' इत्यस्मिन् प्रत्ययः अस्ति–

(अ) क्त्वा (ब) तुमुन् (स) अनीयर् (द) क्तिन्



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

(ग) 'ङीन्' प्रत्ययस्य उदाहरणम् अस्ति–
(अ) नारी (ब) पट्वी (स) अजा (द) श्रीमती

(घ) "कृ + क्तवतु" किं पदं भवति–
(अ) कृतवान् (ब) गतवान् (स) कर्तवान् (द) कर्त्तव्यम्

(ङ) ............ च सारं च वचो हि वाग्मिता।
(अ) सितं (ब) मितं (स) ऋतं (द) अनृतं

प्रश्न 5. प्रदत्तै शब्दैः रिक्तस्थानानि पूरयत– 1x5=5
( नातिसमयं, श्रेष्ठः, साधकं, कुशलं, सत्ये )
(i) अत्र .............. तत्रास्तु।
(ii) सर्वं ............. प्रतिष्ठितम्।
(iii) ................ जह्यात।
(iv) ज्येष्ठः............. कुले लोके।
(v) भारतीयैकता ................. संस्तकृतम्।

प्रश्न 6. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानामम् उत्तरणि संस्कृतभाषायाम् एकवाक्येन लिखत। 3x2=6
(क) सन्तः कानि घ्नन्ति ?
(ख) किं महत् पापम् अस्ति ?
(ग) शिष्यान् कथं परीक्ष्येत् ?
(घ) के कार्यं प्रारभ्य न परिव्यजन्ति ?
(ङ) सर्वप्राचीना भाषा का अस्ति ?

प्रश्न 7. अधोलिखितेषु द्वयोः शब्दयोः शब्दरुपाणि त्रिषु वचनेषु लिखत– 2
(क) 'राम' – द्वितीया विभक्तिः
(ख) 'अस्मद्' – पञ्चमी विभक्तिः
(ग) 'कवि' – तृतीया विभक्तिः

प्रश्न 8. "रमाम्" अथवा 'तव' इति पदस्य विभक्तिं वचनं च लिखत। 2

प्रश्न 9. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– 2x5=10

(क) नातिसमयं जह्यात्। न नियमं भिन्द्यात्। न नक्तं नादेशे चरेत्। न सन्ध्यास्वभ्यवहार स्वप्नसेवी स्यात्। न बालवृद्धलुब्धमूर्खक्लिष्टैः सह सख्यं कुर्यात्। न गुह्यं विवृणुयात्। न कञ्चिदवजानीयात्। न गवां दण्डमुद्यच्छेत्। न वृद्धान् न गुरून् न गणान् न नृपान् वाऽधिक्षिपेत् न चाति ब्रूयात्।
(i) किं न भिन्द्यात् ?
(ii) किं न जह्यात् ?
(iii) बालवृद्धलुब्धमूर्खक्लिष्टैः सह किं न कुर्यात् ?
(iv) किं न विवृणुयात् ?
(v) कुत्र न चरेत् ?

(ख) कालक्रमेण जैन –बौद्धसम्प्रदाययोः विकासोऽपि समभवत्। विशेषरुपेण, गुप्रकाले चतुर्थ्यां शताब्द्यां रामगुप्ताधिशासिते जैनतीर्थङ्कराणां मूर्तिनिर्माणं, तथा च तासां प्रतिष्ठापनं गोलक्यान्त्यायाः सुपुत्रस्य चेलुक्षमणस्य, तच्छिष्यस्याचार्यसर्पसेनस्य च प्रेरणया कारितम् आसीत्। निकटमेव साञ्चीनगरे बौद्धसम्प्रदायस्य स्तूपो वर्तते।
(i) कालक्रमेण कयोः विकासो अभवत् ?
(ii) गुप्तकाले केषां मूर्तिनिर्मानम् अभवत् ?
(iii) जैनतीर्थङ्कराणां मूर्तिप्रतिष्ठापनं कस्य प्रेरणया कारितम् आसीत् ?
(iv) कस्मिन् नगरे बौद्धसम्प्रदायस्य स्तूपो वर्तते ?
(v) "साञ्चीनगरे" इत्यस्य विभक्तिं लिखत।

(ग) वरुणदेवः वृष्टिं वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति। भूमाता वृक्षस्य आधारभूता अस्ति। वायुः अनिलं ददाति। ते सर्वे वालयन्ति पोषयन्ति रक्षन्ति च। ते न कदापि "मम अधिकारः वर्तते" इति अवदन्। ते सर्वे परोपकारिणः। अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गमिष्यथ।
(i) वरुणदेवः किं वर्षति ?
(ii) वृक्षस्य आधारभूता का अस्ति ?
(iii) सूर्यदेवः किं प्रयच्छति ?
(iv) ते कदापि किं न अवदन् ?



http://www.mpboardonline.com
http://www.mpboardonline.com
http://www.mpboardonline.com

http://www.mpboardonline.com

(v) कः अनिलं ददाति ?

प्रश्न 10. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– 2x5=10

(क) दरिद्रता धीरतया विराजते,
कुवस्त्रता शुभ्रतया विराजते,
कदन्नता चोष्णतया विराजते,
कुरूपता शीलतया विराजते,

(i) दरिद्रता कया विराजते ?

(ii) ऊष्णतया का विराजते ?

(iii) कुरुपता कया विराजते ?

(iv) शुभ्रतया का विराजते ?

(v) 'विराजते' इत्यस्मिन् कः लकारः ?

(ख) वहन्ति वर्षन्ति नदन्ति भान्ति,
ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजाः वनान्ताः,
प्रियाविहीनाः शिखिनः प्लवगङ्मा।।

(i) के वर्षन्ति ?

(ii) मत्तगजाः किं कुर्वन्ति ?

(iii) के भान्ति ?

(iv) प्रियाविहीनाः किं कुर्वन्ति ?

(v) के नृत्यन्ति ?

(ग) दानेन भूतानि वशीभवन्ति,
दानेन वैराण्यपि यान्ति नाशम्।
परोऽपि बन्धुत्वमुपैति दानै,
दानं हि सर्वव्यसनानि हन्ति।।

(i) दानेन कानि वशीभवन्ति ?

(ii) केन वैराणि अपि नाशं यान्ति ?

(iii) दानैः कः बन्धुत्वम् उपैति ?

(iv) दानं कानि हन्ति ?

(v) 'यान्ति इत्यस्मिन् कः लकारः अस्ति ?

प्रश्न 11. युग्ममेलनं कुरुत– http://www.mpboardonline.com 1x4=4

| (क) | | (ख) |
|---|---|---|
| (i) कपिलमुनिः | – | (क) सर्पः करोति |
| (ii) रघुः | – | (ख) ब्रूयात् |
| (iii) नानृतम् | – | (ग) कुपितः जातः |
| (iv) फटाटोपम् | – | (घ) दानी |

प्रश्न 12. सत्यवाक्यानां समक्षं "आम्" असत्यवाक्यानां समक्ष "न" इति लिखत– 1x4=4

(क) मनः अपूर्वम् अस्ति।

(ख) मानवशरीरं देवदुर्लभं नास्ति।

(ग) यूथाद् भ्रष्टः दासेरकः घण्टां वादयन्नागच्छति।

(घ) रामदेवः प्रातः स्मरणीयः आसीत् ?

प्रश्न 13. अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत– 1x4=4

(क) वैयाकरणेषु पूर्णः सर्वमान्यश्च कः?

(ख) महती घण्टा केन प्रतिबद्धाः ?

(ग) भारतस्य पुरातनः सखा कः विद्यते ?

(घ) किं परावर्तयितुं न शक्यते ?

(ङ) छत्रशालस्य पितुः नाम किम् ?

(च) दयानन्दस्य जन्म कस्मिन् प्रदेशे अभवत ?

प्रश्न 14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत। 4

प्रश्न 15. स्वप्राचार्यस्य कृते पञ्चदिवसानाम् अवकाशार्थं प्रार्थना–पत्रं संस्कृतभाषायां लिखत। 4



http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

अथवा

स्वमित्राय दशमकक्षायां प्रथमस्थानं प्राप्रये शुभकामनापत्र संस्कृतभाषायां लिखत।

प्रश्न 16. अधोलिखितेषु 'पञ्च' अशुद्धवाक्यानां शद्धिः करणीया। 1x5=5

(i) श्रीमहावीरं नमः।

(ii) सैनिकः अश्वस्य पतति।

(iii) जलस्य विना मीनःन जीवति।

(iv) बालकः विद्यालयस्य प्रति गच्छति।

(v) सः भिक्षुकं दानं ददाति

(vi) अलं विवादात्।

प्रश्न 17. अधोलिखित–वाक्यानां कथानुसारेण क्रमसंयोजनं कुरुत– 1x5=5

(क) गङ्गातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म।

(ख) मया रामदेवस्य जीवनम् एव अनुसरणीयम्।

(ग) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान्।

(घ) वासुदेवः तस्य प्रियशिष्यः आसीत्।

(ङ) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत्।

प्रश्न 18. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत। 1x5=5

सतां सज्जनानां, सङ्गतिः सम्पर्कः, संसर्गो वा सत्सङ्गतिः इति कथ्यते। वस्तुतः सत्सङ्गात् एव मानवः समुन्नतो भवति। सज्जनानां संसर्गेण जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति। स्थाने एवोक्तं " संसर्गजा दोषगुणा भवन्ति " इति। अतः स्वसमुन्नतिम् इच्छता जनेन सर्वदा सतामेव सङ्गतिर्विधेया।

(क) अस्य गद्यांशस्य शीर्षकं लिखत।

(ख) केन जनः सज्जनः भवति ?

(ग) दुर्जनानां संसर्गेण जनः कीदृशः भवति।

(घ) कस्मात् मानवः समुन्नतो भवति।

(ङ) 'दुर्जनः' इतिशब्दस्य विलोमशब्दं लिखत।

प्रश्न 19. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत– 10

(क) अस्माकं देशः

(ख) मम दिनचर्या

(ग) महाकविः ( कालिदासः )

(घ) संस्कृतभाषायाः महत्वम्

http://www.mpboardonline.com

http://www.mpboardonline.com

**http://www.mpboardonline.com**
**Whatsapp @ 9300930012**
**Send your old paper & get 10/-**
**अपने पुराने पेपर्स भेजे और 10 रुपये पायें,**
**Paytm or Google Pay से**



http://www.mpboardonline.com